International Journal of Sanskrit Research 2022; 8(1): 196-200

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(1): 196-200
© 2022 IJSR
www.anantaajournal.com
Received: 07-11-2021
Accepted: 09-12-2021

**Dr. Jinitha KS**
Associate Professor,
Department of Vyakarana,
Sree Sankaracharya University of Sanskrit, Kalady, Kerala, India

**Corresponding Author:**
**Dr. Jinitha KS**
Associate Professor,
Department of Vyakarana,
Sree Sankaracharya University of Sanskrit, Kalady, Kerala, India

# आनन्दगिरेः शङ्करविजयस्था : धार्मिकव्यवस्था :

**Dr. Jinitha KS**

**प्रबन्धसंग्रहः।**

आनन्दगिरेः शङ्करविजयनामकः ग्रन्थः चतुःसप्तत्यध्यायेषु विभक्तः शङ्कराचार्यस्य कथया अलंकृतः च। आचार्यस्य जन्मतः आरभ्य देहत्यागपर्यन्तं ये वृत्तान्ताः आनन्दगिरेः ज्ञाताः ते सर्वे अपि अस्मिन् ग्रन्थे वर्णिताः। ग्रन्थस्यास्य विभिन्नेषु अध्यायेषु शङ्कराचार्यस्य धार्मिकव्यवस्थाचिन्ताः प्रदर्शिताः। विभिन्नदेवरतान् विभिन्नमतानुयायीन् विविधाचारयुक्तान् बहून् अधिकृत्य वर्णनं तत्र वर्तन्ते। अद्वैतस्य प्राधान्यं, कर्मानुष्ठानस्य आवश्यकता, वेषभूषादिकस्य अनावश्यकता, इत्यादि धार्मिकव्यवस्थासम्बद्धाः विषयाः अत्र प्रस्तूयन्ते।

**उपक्रम :।**

भारतस्य दार्शनिकाचार्येषु प्रमुखः श्रीशङ्कराचार्यः। केरलभूमौ एव तस्य जन्म अभवत् इत्येतत् अस्माकं सौभाग्यमेव। यतः एदादृशस्य दीपज्योतिषः जन्मना परिपूतत्वं लब्धम् अस्माकं देशस्य। शङ्कराचार्यस्य जन्मतः आरभ्य स्वर्गारोहणपर्यन्तं याः कथाः सन्ति तासां श्रवणेन मननेन च अस्माकं चित्तशुद्धिः भविष्यति। बहुकालात्पूर्वं तेन यदुक्तं तदद्यापि बहवः जनाः पठन्ति, पाठयन्ति, आचरन्ति च। अत एव वयं जानीमः यद् महतः आचार्यस्य वचनानां प्राधान्यम् अद्याप्यस्ति इति।

पुरातनकालादारभ्य मनुष्याः समूहरूपेण जीवन्ति स्म। यत्र समूहः अस्ति तत्र केषांचन नियमानां आचरणम् अवश्यं कर्तव्यम्। यतः सर्वेषां मनुष्याणाम् स्व-स्व-आग्रहाः सन्ति, चिन्तापद्धतयः सन्ति, स्वजीवनार्थं प्रवृत्तयः च सन्ति। एकस्य आग्रहः कदाचित् अपरस्य विरोधाय स्यात्, एकस्य प्रवृत्तिः पुनरपरस्य दोषाय स्यात्। अतः केषांचन नियमानां परिपालनेनैव समूहस्य उत्तमरीत्या जीवनं सुसाध्यं स्यात्। तदर्थं नियमानां सृष्टिः मूल्यानि आधारीकृत्य, कालक्रमेण संजाता। ये नियमाः धार्मिकाः, कापट्यरहिताः च आसन् तान् नियमान् धार्मिकमूल्यानि इति वक्तुं शक्यन्ते।

सर्वेषु च समूहेषु तत्तत्समूहयोग्या: धार्मिकव्यवस्था: आसन्। पूर्वकाले चातुर्वण्यव्यवस्था वर्तते स्म। तदानीं एकैकस्यापि वर्णस्य तदनुगुणा: धार्मिकव्यवस्था: संजाता:। विभिन्नेषु प्रदेशेषु विभिन्ना: व्यवस्था: प्रचलन्ति स्म। ता: व्यवस्था: बहुषु ग्रन्थेषु उपवर्णिता:। एदादृशग्रन्थानां पठनेनैव तत्तत्कालीनधार्मिकव्यवस्था: ज्ञातुं शक्यन्ते। आनन्दगिरिमहाशयस्य शङ्करविजयनामकग्रन्थपठनेन शङ्कराचार्यस्य जीवितकाले या धार्मिकव्यवस्था आसीत् इति ज्ञातुं शक्यते। शङ्कराचार्यस्य जीवितचरित्रम्, तत्कालीना विविधाः जीवितपद्धतयः, सामूहिकव्यवस्थाः च उत्तमरीत्या तत्र वर्णयन्ति।

## आनन्दगिरे: शङ्करविजय:

चतु:सप्तत्यध्यायेषु विभक्त: अयं शङ्करविजयनामक: ग्रन्थ:। शङ्कराचार्यस्य शङ्करावतारस्य प्रादुर्भावकथया ग्रन्थस्यास्य आरम्भ:। आचार्यस्य जन्मतः आरभ्य गुरो: देहत्यागपर्यन्तं ये वृत्तान्ता: आनन्दगिरे: ज्ञाताः ते सर्वे अपि अस्मिन् ग्रन्थे अतिविपुलरीत्या सरलया शैल्या वर्णिता:।

## शङ्कराचार्यस्य धार्मिकव्यवस्था।

ग्रन्थस्यास्य विभिन्नेषु अध्यायेषु यात्रां कुर्म: तर्हि शङ्कराचार्यस्य धार्मिकव्यवस्थाचिन्तां द्रष्टुं शक्नुम:। अस्मात् ग्रन्थात् ज्ञातुं शक्यते यत् तस्मिन्नवसरे विभिन्नदेवरता: विभिन्नमतानुयायिन : विविधाचारयुक्ता : बहव : समूहा: तत्र वर्तन्ते स्म इति।

> केचिच्छम्भुरता: परे हरिरता वाणीरता: केचन
> केचिद्वह्निरता दिवाकररता विघ्नेशभक्ता: परे।
> केचिच्छक्तिरताश्च भैरवरता: केचित्तु मल्लारिगा:
> विष्वक्सेनरता: परे मदनगा: केचिद्बजन्त्यर्थदम्।।

आचार्यस्य जीवितकाले चातुर्वर्ण्यव्यवस्थिति: प्रचलति स्म। चतुर्वर्णेषु ब्राह्मणस्यैव प्राधान्यं प्रामाण्यं च। नीचा: अपि पुण्यमार्गे क्रियानुगा: तर्हि ते अपि ब्राह्मणत्वं प्राप्नुवन्ति इत्यपि अभिप्राय:।

> उक्तं च - पूज्येषु सेवका नीचा: पुण्यमार्गक्रियानुगा:।
> तत्तदेव पदं चापुर्यथाजातिकुलस्थिति।।

भागवतनिर्वहणनामके षष्ठे अध्याये अपि आचार्य: अब्रवीत्-

> जन्मना जायते शूद्र: कर्म्मणा जायते द्विज:।

## अद्वैतम्।

अद्वैतमेव परमो धर्म: शङ्कराचार्यमते। अत्युग्रं ज्ञानं अद्वैतं, तेन नर: मुक्त: भवेत् इति तस्याशय:।

> अद्वैतनिन्दां कुर्वन्ति ये मूढा: दु:खभोगिन:।
> ते सर्वे नरकं यान्ति मातृनिन्दापरा यथा।।

शैवमतनिर्वहणनामके चतुर्थप्रकरणे आचार्यस्य रामेश्वरवासं वर्णयति। तस्मिन् समये,

> अद्वैतद्रोहिण: केचिल्लिङ्गाङ्कितभुजद्वय:।
> केचित् फाले लिङ्गचिह्नं हृदि शूले तथाऽपरे।।

एवं महेशचिह्नानि धारयित्वा शैवा:, रौद्रा:, उग्रा:, भट्टा:, पाशुपता: च समागता:। एतान् प्रति श्रुतिस्मृतिवाक्यानि उद्धृत्य, अन्यशास्त्रप्रवर्तकानां वचनानि च उक्त्वा अद्वैतमेव परमो धर्म इति तान् बोधयामास। एवं गुरुकटाक्षागतशुद्धाद्वैतविद्यामाश्रित्य अभेदकल्पतरुफलरसपानेन तृप्ता: अभवन्।

## कर्मानुष्ठानम्।

कर्मानुष्ठानं सर्वथा युक्तरीत्या कर्तव्यम् इति आचार्यस्य अपरं मतम्। आश्रमधर्मानुकूलं कर्म

सर्वेषामलङ्घ्यं, तस्यैव तपः शब्दवाच्यत्वात्। सन्यासिनामपि विहितं कर्म कर्तव्यमेव। कर्महीने तु पातित्यम्। अतः वेदोक्तस्य कर्मणः अतिप्राधान्यं कल्पयति आचार्यः। अहरहः सन्ध्यामुपासीत, उदित सूर्ये प्रातर्जुहोति...... इत्यादि वाक्यैः ब्राह्मणोचितं नित्यकर्म प्रशंसन्ति च। सर्वैराश्रमिभिः वेदोक्तं कर्म अवश्यं कर्तव्यमेव। कर्मपरित्यागिनं स: निन्दति च।

जीवन् कर्मपरित्यागं यः करोति नराधमः।
स मूढो नरकं याति यावदाभूतसंप्लवम्।।

इति मनुवचनपुरःसरं देवार्च्चनस्नानभिक्षाचर्यादिकं कर्म यतीनाञ्च विद्यत एव इति सः अस्थापयत्।

सगणः कारयामास नित्यकर्म गुरुं स्मरम्।
स्मार्ताचारपरिश्रान्तः पञ्चपूजाविशारदः।।
त्रिपुण्ड्रं भस्मना कुर्वन् चन्दनेन च सुव्रतः।
स्नात्वा मृत्तिकया चोर्ध्वपुण्ड्रं कुर्वन् प्रयत्नतः।।

शौचाचमन-स्नान-सन्ध्यावन्दन-जपाग्निहोत्र-स्वाध्याय-देवातिथिपूजादिकं कर्म वानप्रस्थ-गृहस्थाश्रमयोः तुल्यमेव। ब्रह्मचारिणस्तु स्नान-सन्ध्यास्वाध्यायेश्वरपूजा-गुरुकुलवासादिकं कर्म उचितम् इत्यादिरीत्या कर्मानुष्ठानस्य अतिप्राधान्यं विवृणोति आचार्य:।

## चिह्नादिधारणस्य अनावश्यकता।

तस्मिन् काले विभिन्नमतानुयायिनः विविधानि चिह्नानि धारयन्ति स्म। एतादृशं वेषभूषादिकं अनावश्यमेव इति आचार्यः बहुषु स्थलेषु अभिप्रैति। वैष्णवमतनिर्वहणनामके प्रकरणे वैष्णवान् निरूप्यते। नारायणभक्तेन वैकुण्ठलोकवासार्थम् अवश्यं शङ्खचक्राद्यङ्कनं कर्तव्यम् इति वैष्णवानां विश्वासः। उक्तं च-

ये बहुमूलपरिचिह्नितशङ्खचक्रा
ये कण्ठलग्नतुलसीनलिनाक्षमालाः।
ये वा ललाटफलके लसदूर्ध्वपुण्ड्रा-
स्ते वैष्णवा भुवनमाशु पवित्रयन्ति।। इति।

तं प्रति शङ्कराचार्यः वदति - मूढ, तप्तशङ्खचक्रधारणं परिहर्तव्यं तद्बोधकश्रुत्यभावात्। पुनरपि परमात्मनो रूपगुणकर्माभावः, तत्स्वरूपज्ञानेनेव मुक्तिदर्शनात्। तपोमूलमेव ब्रह्मज्ञानम्। तस्मात् चक्रादिचिह्नधारणस्य अनवकाशः। तच्चिह्नधारणेन तन्मात्रजपेन च वैकुण्ठप्राप्तिः इति उक्तं युक्तं न। विष्णुचिह्नधारणेन विष्णुसमोऽहं भविष्यामीति फलधिया चेदङ्कधारणमात्रेण ब्राह्मण्यप्राप्तिरिव भाति। अतः सर्वज्ञनित्यशुद्धबुद्धमुक्तस्वरूपं सत्यज्ञानमनन्तमणुमहत्वादि-लक्षणलक्षितं ब्रह्मास्मीत्यनुसन्धानं सदा कुरु। एवं आचार्येण उपदिष्टः सः निरस्तचिह्नः स्मार्ताचारपरिश्रान्तगात्रः पञ्चपूजानैपुण्यतृप्तसकलदेवदत्तवरः स्वकुलग्रामदेशस्थानशेषान् एवमाचकार।

## वेदप्रामाण्यम्।

वेदस्य सर्वप्रामाण्यत्वं स्थापयति सर्वदा आचार्यः। अन्यमतानुयायिनां निराकरणं वेदोक्तप्रमाणैः स्थापयति सः। पाञ्चरात्रागमनिर्वहणं नाम अष्टमे प्रकरणे पाञ्चरात्रागमदीक्षितानाम् उपरि अद्वैतप्रभावः वर्णयति। वेदविरुद्धं भवति एतेषाम् आचारः इति सयुक्तिकम् उदाहरणानि प्रदर्श्य अस्थापयत्। वेदविरुद्धत्वात् मायाकल्पितचक्राद्यङ्कनादिकं परित्यज, शुद्धाद्वैतवृत्या जीवेशैक्यं कुरु, मुक्तो भवतु इति आचार्यः अन्यमतानुयायिनं बोधयति। एतच्छ्रुत्वा अन्यमतस्थाः सर्वेऽपि त्यक्तचिह्नाः परिवर्जितागमाचाराः सन्मार्गगामिनः सन्तः स्वकुलग्रामदेशवासिभिः सह शुद्धाद्वैतवृत्तिं प्राप्य स्नान-सन्ध्याग्निहोत्र-स्वाध्याय-वैश्वदेवातिथिपूजापरायणाः सर्वजगद्रूपेणावगतं ब्रह्मेति ध्यात्वा तथैवाहमस्मीति मुक्ताः अभवन्।

**कर्ममार्गः ज्ञानमार्गः च।**

लोके मार्गद्वयं वर्तते, कर्ममार्गः ज्ञानमार्गः चेति। तावदाद्यं स्वर्गादिकामनया श्रुतिस्मृत्युक्तकर्मकरणम्। ज्ञानमार्गो नाम वेदोक्तसर्वकर्माणि कृत्वा तत्फलसमर्पणम्। कर्मफलपरित्याग एव ज्ञानमार्ग मुमुक्षुमार्गः। निजवर्णधर्माच्चलितस्य ब्राह्मण्याभावः, तस्य बाह्मण्यमपि नश्यति।

श्रुतिस्मृतिसदाचारा आज्ञारूपा हि मे मता ।
आज्ञाच्छेदो मम द्रोही स याति नरकं सदा।।

कर्महीनवैष्णवमतनिर्वहणनामके प्रकरणे-

तस्माद्भवान् सभां गत्वा द्वादश प्रदक्षिणनमस्कारान् कृत्वा समस्तापराधं क्षमध्वमिति विश्वासपूर्वकं सम्प्रार्थ्य ब्रहमदण्डं समर्प्य ब्राह्मण्यं सम्पाद्य कृतार्थो भव इति श्रीशङ्कराचार्यै उक्तः नामतीर्थ :।

उच्छिष्टगणपतिमतनिर्वहणं नामके सप्तदश प्रकरणे गणपत्युपासकानां परामर्शाः सन्ति। स एव वदति उच्छिष्टगणपत्युपासकः हेरम्बसुतः इति प्रसिद्धः। उच्छिष्टगणपतिमतस्य ज्ञानमतं हैरम्बमित्युच्यते। तदीयध्यानन्तु।

चतुर्भुजं त्रिनयनं पाशाङ्कुशगदाभयं ।
तुण्डाग्रपीतमधुकं गणनाथमहं भजे ।।

मदीयाचारे धर्मद्वयमेवानुवर्तनीयम्। पुरुषाणां सार्वजातिकानां एकजातिवदित्येको धर्मः, स्त्रीणां सार्ववर्णिकानां एकजातिवदित्येको धर्मः, तेषां तासां च संयोगे वियोगे च दोषाभावः। अस्या अयमेव पतिरिरिति नियामकाभावात्। उच्छिष्टगणपते अखण्डानन्दरूपत्वेन ब्रह्मरूपत्वेन च तन्मतमनन्यभेद्यम्। मुमुक्षुभिः सर्वैः उच्छिष्टगणपतिमतं उपासनीयम्। तं प्रति आचार्यः अवदत्-

भो हेरम्बसुत, भवन्मतमनुचितम्। वेदविरोधसद्भावात्। न सुरां पिबेत् न कलञ्जं भक्षयेत् न परदारां गच्छेत् इत्यादीनि बहुनि वचनानि वेदे सन्ति। भवत्प्रमुखाः संसारिण सुरां पिबामः कलञ्जं भक्षयामः प्रतारणबुद्धिरित्याजल्पथ तदत्यन्तदौष्टं नरकप्रदमेव मतं, तस्माच्च मूढबुद्धिं परित्यज्य ब्रह्मसभानुग्रहात् कलितप्रायश्चित्ताः यूयं मुक्तिमार्गमवलम्ब्य पञ्चपूजापराः पञ्चयज्ञादि नित्यकर्मनिरताश्च श्रुत्याचारपरिश्रान्ता अद्वैतविद्याभ्यासतत्परा : बभूवुः इति। एवं कर्ममार्गस्य ज्ञानमार्गस्य च प्राधान्यं विवृणोति आचार्यः।

**उपसंहारः।**

आनन्दगिरेः शङ्करविजयनामकः ग्रन्थः अतिप्रसिद्धः। चतुःसप्तत्यध्यायेषु विभक्तः अयं ग्रन्थः शङ्कराचार्यस्य शङ्करावतारस्य प्रादुर्भावकथया च अलंकृतः। आचार्यस्य जन्मतः आरभ्य देहत्यागपर्यन्तं ये वृत्तान्ताः आनन्दगिरेः ज्ञाताः ते सर्वे अपि अस्मिन् ग्रन्थे वर्णिताः। ग्रन्थस्यास्य विभिन्नेषु अध्यायेषु शङ्कराचार्यस्य धार्मिकव्यवस्थाचिन्ताः प्रदर्शिताः। विभिन्नदेवरतान् विभिन्नमतानुयायीन् विविधाचारयुक्तान् बहून् अधिकृत्य वर्णनं तत्र वर्तन्ते। तत्कालीनान् धार्मिकव्यवस्थान् अवगन्तुं सहायकाः एतादृशाः कथाः। अद्वैतमेव परमो धर्मः शङ्कराचार्यमते इति शङ्करविजयस्थकथाभिः ज्ञायन्ते। अत्युग्रं ज्ञानम् अद्वैतं, तेन नरः मुक्तः भवेत् इति तस्याशयः। कर्मानुष्ठानं सर्वथा युक्तरीत्या कर्तव्यम् इति आचार्यस्य अपरं मतम्। आश्रमधर्मानुकूलं कर्म सर्वेषामलङ्ख्यम्। सन्यासिनामपि विहितं कर्म कर्तव्यमेव। तस्मिन् काले विभिन्नमतानुयायिनः विविधानि चिह्नानि धारयन्ति स्म। एतादृशं वेषभूषादिकं अनावश्यमेव इति आशयः बहुषु स्थलेषु द्रष्टुं शक्यते। वेदस्य सर्वप्रामाण्यत्वम् एवम् अन्यमतानुयायिनां निराकरणं वेदोक्तप्रमाणैः स्थापयति। लोके दृष्टं मार्गद्वयं, कर्ममार्गः ज्ञानमार्गः च अधिकृत्य चर्चा विद्यते। कर्मफलपरित्याग एव ज्ञानमार्ग मुमुक्षुमार्गः। निजवर्णधर्माच्चलितस्य ब्राह्मण्याभावः, तस्य बाह्मण्यमपि नश्यति। एताः

धार्मिकव्यवस्थाः आनन्दगिरेः शङ्करविजयात् अवगन्तुं शक्यन्ते।

**Reference**

1. A Critical Survey of Indian Philosophy, Dr. Chandradhar Sharma, Motilal Banarsidass Publishers Private Limited, Delhi, 1997.
2. Sankaravijaya, Edited by Jayanarayana Tarkapanchanana, Asiastic Society of Bengal, Calcutta, 1868.
3. Sankaravijaya of Anandagiri, Edited by N Veezhinathan, Centre of Advanced Study in Philosophy, University of Madras, 1971.
4. Sankaravijaya, Edited by Pandit Jibananda Vidyasagara, Sarasudhanidhi Press, Calcutta, 1881.